एकादशे चायं शुभः। "विक्रमायरिपुगः कुजःशुभः स्यात्तदान्यसुतधर्म्मगैः खगैः। चेन्न विद्ध इनस्तनुरप्यसौ" ज्यो०त० उक्तस्थानेषु अन्यग्रहासत्त्वे शुभदः अन्यसुतधर्म्मस्थितोऽयं क्रमेण तृतीयैकादशषष्ठेषु अन्यग्रहैः स्थितैर्वामवेधेन शुद्धः "रक्तस्रावविषास्त्रकर्म्मकुतलुककार्य्यं विवादं रणं कुर्य्याद्द्वन्द्वविधिं सुदुष्टदमनम् सेतुप्रभेदं तथा। वृक्षच्छेदनभेदनानि मृगयां चौर्य्यं तथा साहसं सेनान्यं कृषिकर्म्म धातुकरणं भौमस्य लग्ने ऽह्नि वा" ज्यो०त०। उक्तकर्म्म तद्वारे तल्लग्ने च शुभदम्। कर्कटराशौ रात्रौ वर्षप्रवेशेऽयं त्रिराशिपतिः, वृश्चिकलग्ने दिने वर्षप्रवेशे अयं त्रिराशिपतिः, मकरराशौ वर्षप्रवेशे दिवानिशोरयं त्रिराशिपतिः वर्षलग्नात् षष्ठस्थानमस्य हर्षपदम् मूलं नी०ता० दृश्यम्। अन्यद्ग्रहशब्दे वक्ष्यते

**कुजप** पुंत्रि० कुत्सितं जपति—जप—अच्। कुत्सितजपकारके तस्येदम् अण्। कौजप तत्सम्बन्धिनि त्रि० कार्त्तेन सह द्वन्द्वे तस्य प्रकृतिस्वरः पा०

**कुजम्भ** त्रि० कुत्सितो जम्भोदन्तोऽस्य। १कुत्सितदन्तयुक्ते २असुरभेदे पु०"प्रह्लादस्य त्रयःपुत्रा विक्रान्तास्र महाबलाः। विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः" हरिव० २२६अ० "विरोचनानुजश्चैव कुजम्भोनाम वीर्य्यवान्" हरिव० २४२अ०।

**कुजम्भन** पु० कोः पृथिव्या जम्भनमिवात्र। सन्धिचौरे हारा० तस्य पृथिव्यां सन्धिखननकाले मैथुनवदाचरणात् तथात्वम्। कुजम्भोऽस्त्यस्य इलच्। कुजम्भिलोऽप्यत्र शब्दरत्ना०।

**कुजा** स्त्री कोः पृथिव्याः जायते जन—ड। सीतादेव्यां तस्याः पृथिवीतोजन्मकथा कालि० ३७अ० "तच्छ्रुत्वा जनको राजा प्रविश्यान्तःपुरं स्वकम्। भार्य्याभिर्मन्त्रयामास यज्ञार्थं पुत्रजन्मने। मन्त्रयित्वा तदा राजा महिषीप्रमुखैः स्वयम्। चतसृभिस्तु भार्य्याभिर्यज्ञार्थं दीक्षितोऽभवत्। ततः पुरोधसं राजा गौतमं मुनिसत्तमम्। तत्पुत्रञ्च शतानन्दं पुरोधायाकरोन्मखम्। द्वौ पुत्रौ तस्य सञ्जातौ यज्ञभूमौ परौ स्मृतौ। एका च दुहिता साध्वी भूम्यन्तरगता शुभा। नारदस्योपदेशेन यज्ञभूमिं ततो नृपः। हलेन दारयामास यज्ञवाटावधि स्वयम्। तद्भूमौ जातसीतायां शुभां कन्यां समुत्थिताम्। लेभे राजा मुदा युक्तः सर्वलक्षणसंयुताम्। तस्यान्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्। जगाद वचनञ्चेदं गौतमं जनकं नृपम्। पृथिव्युवाच। एषा सुता मया दत्ता तव राजन्मनोहरा। एनां गृहाण सुभगां लोकद्वयशुभावहाम्। अनया मे महाभार उद्धृतौ हेतुभूतया। क्षयं यास्यति भारार्त्तिं मोचयिष्यामि दारुणाम्। रावणाद्या महावीराः कुम्भकर्णादयोऽपरे। नाशं यास्यन्ति दुर्द्धर्षाः कृतेऽस्या राक्षसाः परे। त्वञ्च मोदं दुराधर्षं यद्दहित्वं कृतं नृप!। अवाप्स्यसि सुराणाञ्च पितृणामृणशोधनम्"। कुजाः वृक्षा आश्रयत्वेन सन्त्यस्याः अच्। २कात्यायनीदेव्यां मेदि० "कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः। विल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिका" इत्युक्तनवपत्रिकाणाम् "तव स्थानमिदं मत्ये" इति मन्त्रलिङ्गेन आश्रयणीयत्वोक्तेस्तस्यास्तथात्वम्।

**कुजाष्टम** पु० कुजो मङ्गलग्रहोऽष्टमोयत्र। ज्यो० उक्ते जन्मलग्नावध्यष्टमस्थानस्थितमङ्गलग्रहरूपयोगभेदे "सर्व्वगुणान्निहन्त्याशु विलग्नादष्टमः कुजः। अस्तगे नीचगे भौमे शत्रुक्षेत्रगते ऽपि वा। कुजाष्टमोद्भवो दोषो न किञ्चिदपि विद्यते,, ज्यो०।

**कुज्जिश** पुंस्त्री० मत्स्यभेदे "कुज्जिशोमधुरोहृद्यः कषायोदीपनस्तथा। "बल्यः स्निग्धोगुरुर्ग्राही वातकृत् रोचनोमतः" राजनि०। स्त्रियां जातित्वात् ङीष्।

**कुज्या** स्त्री सि०शि०उक्ते वृत्ताकाराक्षक्षेत्राद्यवयवधनुः साधनाङ्गज्यापञ्चकान्तर्गते जीवाभेदे। ज्यापञ्चकं च तत्र दर्शितम् यथा इदानीं पञ्चज्यासाधनमाह।"युक्तायनांशादपमः प्रसाध्यः कालौ च खेटात् खलु भुक्तभोग्यौ। जिनांशमौर्व्यां१३९७गुणितार्कदोर्ज्या त्रिज्यो३४३८ द्धृता क्रान्तिगुणोऽस्य वर्गम्। त्रिज्याकृतेः ११८१९८४४ प्रोह्य पदं द्युजीवा क्रान्तिर्भवेत् क्रान्तिगुणस्य चापम्। अक्षप्रभासंगुणितापमज्या तद्द्वादशांशो भवति क्षितिज्या। सा त्रिज्यकाघ्नी विहृता द्युमौर्व्या चरज्यकाख्यास्य धनुश्चरं स्यात्" सि०शि०। "अत्र खेटादित्युपलक्षणम्। यस्मात् खेटाल्लग्नाद्वाऽपमः साध्यस्तस्मात् सायनांशादेव। तथा यस्मादुदयसम्बन्धिनौ भुक्तभोग्यकालौ साध्यौ तस्मादपि सायनांशादेव। सायनार्कस्य दोर्ज्यां जिनभागज्यया गुणिता त्रिज्यया भक्ता क्रान्तिज्या स्यादित्यादि स्पष्टार्थम्। अस्योपपत्तिः। विषुवत्क्रान्तिवृत्तयोर्यास्योत्तरमन्तरं क्रान्तिः। तयोर्हि संपाते क्रान्त्यभावः। ततस्त्रिभेऽन्तरे परमा जिनतुल्यभागाः। अतस्तत्-